| | | | |
|---|---|---|---|
| तप्तिः- [1]तपस्या, | तापना, | तितप्सा, | तातपा; |
| तपनम्, | तापनम्, | तितप्सनम्, | तातपनम्; |
| तप्त्वा, | तापयित्वा, | तितप्सित्वा, | तातपित्वा; |
| सन्तप्य, | सन्ताप्य, | संतितप्स्य, | संतातप्य; |
| तापम् २, तप्त्वा २, | तापम् २, तापयित्वा २, | तितप्सम् २, तितप्सित्वा २, | तातपम् २; तातपित्वा २. |

(704) "**तप ऐश्वर्ये**" (IV-दिवादिः-1159. अक. अनि. आत्म.)

'सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् ।

ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च ॥' (श्लो. 131) इति **देवः** । अयं धातुः ऐश्वर्येऽर्थे विकल्पेन तङ्श्यनौ लभते । तदभावे शब्विकरणः परस्मैपदी बोद्धव्यः । केचित्तु 'वा' इति पदं 'वृतु वरणे' इत्यनन्तरं पठिष्यमाणस्य धातोः आद्यावयवमिच्छन्ति । अत एव 'ततो **वावृत्यमाना** सा रामशालां न्यविक्षत ।' [भ. का. 4-28] इति **भट्टिप्रयोगः** संगच्छते । तन्मते ऐश्वर्येऽर्थे अस्माद् धातोः तङ्श्यनौ नित्यमेव भवतः । '**पत**' इति, अस्यैव पाठान्तरं केचिदिच्छन्ति । अत एव 'द्युतद्यामा नियुतः **पत्यमानः**' इति प्रयोगस्योपपत्तिर्भवति । **निरुक्तेऽपि** 'इरज्यति **पत्यते** क्षयति राजतीति चत्वार ऐश्वर्यकर्माणः' इत्युक्तम् । तापकः-पिका, तापकः-पिका, तितप्सकः, प्सिका, तातपकः-पिका; तप्ता-त्री, तापयिता-त्री, तितप्सिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतपतिवत् (703) बोध्यानि । दिवादिषु आत्मनेपदमध्ये पाठात् शानचि संतप्यमानः[A], तप्स्यमानः, तितप्समानः, तितप्सिष्यमाणः; इत्यादीनि रूपाणि भवन्तीति विशेषः ।

---

1. 'असुन्' [द. उ. 9-49] इत्यसुन्प्रत्यये **तपः**=तपति शरीरमिति कायक्लेशात्मकः शुद्धाचारः । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' (3-1-15) इति क्यङ् । 'सनाद्यन्ता धातवः' (3-1-32) इति धातुसंज्ञा । 'अ प्रत्ययात्' (3-3-102) इति स्त्रियां भावादौ अकारप्रत्ययः । टाप् । **तपस्या**=तपः ।

A. 'गूर्णेऽस्मिन् बहुजन्तुघूरिणि खले जूर्णैः शशंसे नृभिः
शौरिः शूरकगर्वचूरणपरः **सन्तप्यमानः** सताम् ।' धा. का. 2. 60.